**** शुभ दीपावली ****

दिनाङ्क :- 08.11.2026

प्रात: - 06:55

अथवार्ता:

राष्ट्रपतिपीएम-दीपावली

राष्ट्रपतिः द्रौपदी-मुर्मु: प्रधानमन्त्री नरेन्द्र-मोदी च ह्य: दीपावल्याः पूर्वसन्ध्यायां देश-विदेशेषु च निवसद्भ्यः समेभ्यः भारतीयेभ्यः शुभाशंसाः प्रायच्छताम्। एकस्मिन् सन्देशे राष्ट्रपतिः अवोचत् यत् दीपावली-पर्व्व नकारात्मक-प्रवृत्तीनाम् उपरि सङ्गुणानां विजयस्य प्रतीकं वर्तते। अपरत्र प्रधानमन्त्री सामाजिक-सञ्चार-प□त्रे एकं दृश्याङ्कन-सन्देशं प्रसारयन् अकथयत् यत् अयं दीपोत्सवः समग्रं देशं प्रकाशयति अथ च अन्धकारस्य उपरि विजयं प्राप्तुं दृढ-सङ्कल्पं दर्शयति। श्रीमोदी प्रार्थितवान् यत् अयं प्रकाश-पर्व अथ आगामी कालः सर्वेषां जीवने सुखं, शान्तिं, समृद्धिं च आनयेत्।

बाइ□ पीएम दिवाली विशिज़

झारखण्ड्- महिला-आयोग:

राष्ट्रिय-महिला-आयोगः झारखण्ड्-राज्यस्य राञ्ची-नगरे नवम्बर मासस्य ष□दिनाङ्के आदिवासि-सामाजिक-कार्यकर्त्री-निशा भगत् इत्यस्याः मृत्योः विषये प्रसारमाध्यमानां प्रतिवेदने स्वप्रेरणया संज्ञानम् अगृह्णात्। प्रतिवेदनानुसारं, फ़ेसबुक लाईव-इति सत्रस्य समये सा अन्तर्जालीय-उत्पीडनस्य विषये, स्थानीय-प्रशासनस्य, आरक्षकाणां परिवादानां च विषये दुःखं प्रक□तवती, तथा च स्वजीवनस्य समाप्तेः विचारम् अपि प्रक□तवती। एन्. सी. डब्ल्यू. इत्यस्य अध्यक्षया विजया रहा□करः इत्यनया निष्पक्षं समयबद्धं च अन्वेषणं, आरक्षकाणां प्रतिक्रियायाः कार्यस्य च समीक्षां, डिजि□ल्-साक्ष्यस्य संरक्षणाय च आदिष्टवती।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यत□

प्रोमो - सोशल मीडिया

रक्षामंत्री राजनाथ-सिक्किम

रक्षामंत्री राजनाथसिंहः अद्य प्रातः भारत-चीनसीमायां नियुक्तैः सैनिकैः सह दीपावलिम् आचरितुं सिक्किम्-राज्यं गमिष्यति। रक्षामंत्री नाथुला-नगरस्य समीपे शेरथाङ्ग-युद्धस्मारकं गत्वा राष्ट्राय प्राणत्यागं कृतवद्भ्यः वीरसैनिकेभ्यः श्रद्धाञ्जलिम् अर्पयिष्यति। श्रीसिङ्घः अस्मिन् क्षेत्रे नियुक्तैः रक्षाकर्मचारिभिः सह अपि संवादं विधास्यति।

क्रिक□

वेलिङ्ग□-नगरस्य 'हेनरी-क्रीडाङ्गणे' वृष्टि-बाधानन्तरम् 'डकवर्थ-लुईस-स□' नियमानुसारं भारतेन न्यूजीलैण्ड-दलं चतुर्भिः धावनाङ्कैः पराजितम्। क्रीडा-स्थगन-वेलायां भारतीया चमू: षड्विंशति-चक्रेषु त्रयोदशोत्तरैकशतधावनाङ्कान् समर्जयत्।

अनेन विजयेन पञ्च-स्पर्धात्मिकायां शृङ्खलायां भारतं सम्प्रति 'द्वे-शून्यं इत्यनेन अनुपातेन अग्रत्वं भजते।

संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

॥ **इति वार्ताः**॥